श्रीबदरीशसुप्रभातम्

(स्तोत्रकाव्यम्)

प्रणेता :

डा० सी० आर० स्वामिनाथन्

टीकाकार:

पं० रघुनाथ शर्मा

१९८३

प्रकाशिका

देववाणी-परिषद्, दिल्ली

६, वाणी-विहारः, नयी दिल्ली-११००५९

(भारतम्)

श्रीबदरीशसुप्रभातम्

(स्तोत्रकाव्यम्)

प्रणेता :

डा० सी० आर० स्वामिनाथः 'कार्यकारः'

एम० ए०, पीएच० डी०, साहित्याचार्यः

केन्द्रीयशिक्षासंस्कृतिमन्त्रालये उपशिक्षापरामर्शदाता (संस्कृते)

टीकाकारः

पं० रघुनाथ शर्मा

व्याकरणाचार्यः, डी०लिट्०

१९८३

प्रकाशिका

देववाणी-परिषद्, दिल्ली

६, ज्ञानी-विहारः, नयी दिल्ली-११००५९

(भारतम्)

श्रीबदरीशसुप्रभातम्

लेखकः : डा० सी०आर० स्वामिनाथन् 'कार्यकारः'

प्रकाशिका : देववाणी-परिषद्, दिल्ली
६, वाणी-विहारः, नयी दिल्ली-११००५९

मुद्रकः : देववाणी प्रिंटर्स
उत्तम नगर, नयी दिल्ली-११००५९

संस्करणम् : प्रथम, १९८३

मूल्यम् : दश रूप्यकाणि रु० १०.००

ŚRĪBADARĪŚASUPRABHĀTAM

Author : Swaminathan, (Dr.) C. R.

Publisher : Devavani Parishad, Delhi
6, Vani Vihar, New Delhi-110059

Printer : Dev Vani Printers
Uttam Nagar, New Delhi-110059

Edition : First, 1983

Price : Rs. Ten only. Rs. 10.00

प्रास्ताविकम्

'देववाणी-परिषद्, दिल्ली' संस्थाया उद्देश्येषु सद्ग्रन्थ-प्रकाशनमप्यन्यतममस्ति। तदनुसारमद्यावधि परिषदा पञ्चविंशतिसङ्ख्याकाः ग्रन्थाः प्रकाशिताः। एतदतिरिक्तं परिषद् 'अर्वाचीनसंस्कृतम्' इत्याख्यस्य स्व त्रैमासिकमुखपत्रस्य माध्यमेन अर्वाचीनसंस्कृतरचनानां परिचयमपि पाठकेभ्यो ददाति।

परिषदा १९८० तमेशवीयेऽब्दे कार्यकारोपाह्व डा०शास्त्रपुरम् रामकृष्ण (सी०आर०) स्वामिनाथन्महाभागानां 'कर्णभूषणम्' (नाटक-शोक-गीति-प्रबन्धात्मकं रचनात्रयम्) प्रकाशितमासीत्। तस्य ग्रन्थस्य प्रास्तविके मया यस्य 'श्रीबदरीशसुप्रभात'स्य (श्रीबदरिकेश्वरसुप्रभातस्य) सङ्केतः कृत आसीत्, तस्यैवेदानीम् 'बलिया'जनपदान्तर्गत'छाता' — ग्रामनिवासिभिः, एकोत्तरैकोनविंशतितमेशवीयेऽब्दे अक्टूबरमासस्य चतुर्दशतारिकायां लब्धजन्मभिः, वाक्यपदीयादिग्रन्थेषु कृतटीकैः लघुजूटिका—अम्बाकर्त्रीअहमर्थविवेकसमीक्षा-प्रभृतिग्रन्थैः संस्कृतवाङ्मयस्य वृद्धिं कुर्वद्भिः, पञ्चमविश्वसंस्कृतसम्मेलनावसरे काशी-हिन्दूविश्वविद्यालयेन 'डी०लिट्०' उपाधिना सम्मानितैः, भारतराष्ट्रपतिपुरस्कृतैः किञ्च २०-३-१९८२ ई० तारिकायां देववाणी-परिषदा अभिनन्दितैस्त्र्यशीतिवर्षदेशीयैः पण्डित रघुनाथशर्ममहाभागैः विरचितया व्याख्यया साकं परिषदा प्रकाशनं क्रियते। इयं व्याख्या २०३९ तमे वैक्रमाब्दे कार्तिककृष्णत्रयोदश्यां शनिवासरे 'बलिया' जनपदान्तर्गते 'छाता' - नाम्नि ग्रामे पूर्णासीत्- इति व्याख्यापुष्पिकया ज्ञायते।

संस्कृतस्य टीकासाहित्यं विपुलमस्ति। वस्तुतः मूलग्रन्थस्य व्याख्यामिषेण विद्वांसो रचनाकारस्य सारस्वतं सम्मानं विदधति। पुनश्च

आगामिनां सुकुमारमतीनां पाठकानां कृते सौविध्यमपि जनयन्ति। क्वचिच्च सरलपद्यानां गूढातिगूढा व्याख्याप्यवलोक्यते। एतादृशे व्याख्यापाटवे मूलरचनाकारस्य प्रतिष्ठा तु वर्धत एव व्याख्याकारस्यापि वैदुष्यं समालोक्यते। क्वचिन्मूलग्रन्थस्य खण्डनार्थं तत्कर्तुश्च धर्षणार्थमपि टीका विलिख्यन्ते। अरोचकी-सतृणाभ्यवहारी-प्रभृतिवर्गेषु टीकाकर्तारो विभज्यन्ते विद्वद्भिः। एतत्तु विनिश्चितं यद् रचनाकार-व्याख्याकारौ अन्योन्यमुपकारिणौ। द्वयोरपि संलापो जिज्ञासूनामुपकारकः।

प्रायः पूर्ववर्तिग्रन्थकाराणां रचनासु परवर्तिभिर्विद्वद्भिः स्वदेश-कालानुमतसमीक्षामानदण्डैष्टीका विरच्यन्ते। अत्र पुनरयं विशेषो यद् ग्रन्थकर्त्ता टीकाकारश्च उभावपि समकालीनौ। मूलग्रन्थकर्ता च वयसा टीकाकर्तुः पङ्विंशतिवर्षैः कनिष्ठः। एतावुभावपि दीर्घायुष्यं लभेतामिति परमेश्वरः प्रार्थ्यते।

अत्र ग्रन्थारम्भे 'निवेदन' रूपेण 'बदरीशसुप्रभात'स्य रचना-प्रेरणादि विषये ग्रन्थकृता यत्सङ्केतितम्, यच्च आंग्लभाषायां भूमिका (Foreward) रूपेण श्री एन० रघुनाथ अय्यरमहाभागैर्लिखितम्-तदुभयमपि जिज्ञासूनां सहृदयानाञ्चोपकाराय भविष्यतीत्याशास्यते। जगद्गुरूणां पुनराशीर्वादः कस्य श्रेयसे न स्यात्? रचनाकारस्य परिचयोऽस्य ग्रन्थस्य पृष्ठभागे दीयते।

डा० स्वामिनाथमहाभागा 'श्रीबदरीशसुप्रभात'स्य रचनार्थं पं० रघुनाथशर्माणश्च तट्टीकार्थं मुहुर्मुहुरभिनन्द्यन्ते। देववाणी-परिषदे-तेषामाभारमावहति यदेभिः स्वमनोरमरचनायाः टीकायाश्च प्रकाशन-मतोऽनुमतम्।

विदुषामश्रवः
रमाकान्त शुक्लः
महासचिवः,
देववाणी-परिषद्, दिल्ली।

१०-३-१९८३ ई०
६ वाणी-विहारः,
नयी दिल्ली-११००५९

॥ श्रीः ॥

श्रीमत्परमहंसपरिव्राजकाचार्य-

जगद्गुरुश्रीशङ्करभगवत्पादाचार्य-परम्परागतं श्रीकामकोटि-पीठमहासंस्थानम्

काञ्चीपुरम्

यात्रास्थानम्—पुष्करक्षत्रम्

योगेश्वरस्य भगवतो बदरीनारायणस्य, तदावासभूत-उत्तुङ्गहिमशैले विराजमानबदरिकाश्रमस्य च महिमा 'श्रीबदरीशसुप्रभात'नामककाव्ये कार्यकारस्वामिनाथशर्मणा सम्यगुपवर्णितं समग्रम् अस्माभिः परिशीलितम् ॥

तत्र न केवलं बदरिकाश्रमवर्णनं, किन्तु भारतभागवतादि-ग्रन्थेषु विद्यमानाः बदरिकाश्रमसंबद्धविषयाश्च सर्वेषामव-गमनाय तत्र तत्र उद्धृतास्सन्ति। विशिष्य भगवत्पादाद्या-चार्याणां चिरञ्जीविनां भागवतादीनां च स्मरणम् अस्य पठनेन संजायते। प्रातःकाले एतादृशमहापुरुषाणां भक्तानां स्मरणेन स्तवनेन च त्रिकरणशुद्धिः समुपजायते। एतद्द्वारा तेषामनु-ग्रहोऽपि लभ्यते ॥

अतः काव्यरचनायां प्रेरितवतः सि० एस्० रामचन्द्रशर्मणः, काव्यरचयितुः सि० आर० स्वामिनाथशर्मणः, व्याख्याकर्तुः पण्डितवरस्य श्रीरघुनाथशर्मणः, पठितॄणां च अनन्तस्वरूपस्य श्रीबदरिकेश्वरस्य कृपया सर्वश्रेयः प्रेयः परम्परावाप्तिः भूयादित्याशास्महे ॥

रौद्री अधिकज्येष्ठ-पौर्णमी
पुष्करक्षेत्रम्

नारायणस्मृतिः

श्रीः

निवेदनम्

अस्माकं सनातन-धर्म-परम्परायां स्नानसन्ध्यादिकक्रमेण देव-पूजनमपि नित्यकर्मरूपेण विहितं वर्तते। स्वेष्टदेवतायाः कुलदेवतायाः वाराधनक्रमे वैदिकप्रक्रियायां वा कल्पसूत्रादिषु अथवागमेषु निर्दिष्टां प्रक्रियां वा स्वस्वकुलाचाररूपेणानुतिष्ठन्ति सन्तः; पञ्चोपचारैः षोडशोपचारैः अन्यैश्च विविधराजोपचारैः स्वहृदयान्तःस्थां देवतां वहिः प्रस्तरे शालिग्रामादिषु वा विभाव्य पूजां कुर्वन्ति। तत्र राजोपचारेष्वन्यतमं सर्वप्रथमतया प्रातःस्तुतिवचनैः देवतायाः जागरणम्, इयं प्रक्रिया सुप्रभातमिति नाम्ना दक्षिणदेशमन्दिरेषु वहु प्रचलति। श्रीमद्रामायणे विश्वामित्रेण कृतं श्रीरामस्योत्थापनं—"**कौशल्या सुप्रजा राम**" इत्यादि दशरथस्य शय्यागृहस्य वहिः सुमन्त्रेण कृतं राजस्तवनञ्चेदं सूचयति यदियं प्रक्रिया राजोपचारेष्वन्यतम आसीदिति। मागधाः वन्दिनश्च राज्ञामुद्बोधनाय प्रभातस्तवं कुर्वन्तिस्म।

इति विरचितवाग्भिर्वन्दिपुत्रैः कुमारः
सपदि विगतनिद्रस्तल्पमुज्झाञ्चकार।

इति कालिदासपंक्तिरपि प्रमाणमत्र।

देवतोद्दिष्टेन सुप्रभातेन श्रोतॄणां वक्तॄणाञ्चास्मादृशां मनसि न केवलं तद्विषयिणी श्रद्धा जागर्ति किन्तु तत्सम्बद्धानां पुण्यकथानां महापुरुषाणां लीलाविशेषाणाञ्च स्मरणं समुदेति। अत एतादृशानां स्तोत्राणां पठनं श्रावणञ्च मन्दिरप्रान्तेषु प्रतिदिनं प्रातरेव यदि प्रचलति तर्हि तत्रत्यानां जनानां कृते सात्त्विकभावानागाः समुन्मीलनायोपकुर्य्यात्। अनेनोद्देश्येनोत्तरभारतीयमन्दिरेष्वयं सम्प्रदायोऽनुसर्त्तव्य इति मम

मनीषा वहो: कालादासीत् । यदा मत्सुहृद्वर: सी० एस० रामचन्द्रन् महाशयो बदरीनाथक्षेत्रनिर्वाहसमित्या अध्यक्ष आसीत्, तदानीं तस्य प्रेरणया ममेयमाशा फलेग्रही अभूत् । एवं बदरीशसुप्रभातनामस्त्रोत्रं व्यरचयम् । तस्य मुद्रणञ्च समभूत् ।

इदमपि वैशिष्ट्यमस्य लघुस्तोत्रस्य यदत्र श्रीमद्भागवते महाभारते च बदरीक्षेत्रसम्बन्धीनि यानि कथनानि सन्ति, तेषामप्युल्लेखोऽत्र कृत: । मुद्रितस्यास्य पुस्तकस्य सदुपयोगाय ये ये आस्तिका: संस्कृतज्ञा: मत्सकाशमागच्छन्ति तेभ्य: उपहाररूपेण वितरणञ्च क्रियते । सन्दर्भवशादियं पुस्तिका **'बलिया'** जनपदवासिनां वैयाकरणप्रकाण्डानां श्रीरघुनाथ शर्मणां सविधे तेषामनुग्रहैकाग्रहेण मया प्रेषिता । असीमया कृपया वात्सल्येन च ते तस्या: व्याख्यानं लिखित्वा मामनुगृहीतवन्त: । नाहं तादृश: कवि:, न च मे कृतिस्तादृशी, या श्रीरघुनाथार्याणां दृष्ट्या व्याख्यानयोग्या स्यात् ।

अत्र मन्ये, तेषां मय्यनुरागविशेष एव हेतु: । व्याख्यायामस्यां श्रीरघुनाथशर्मभि: उक्तानुक्तदुरुक्तरूपा बहवो दोषा. दूरीकृतास्सन्ति । तदर्थं ममाधमर्णतां निवेदयामि । मत्कृतानां दोषाणां दूरीकरणप्रसङ्गे पोरौभाग्यस्य गन्धलेशोऽपि न तैर्दर्शित: । प्रत्युत बालिशस्यापि ममो पक्रमस्य ते साधुवादानेव कृतवन्त इति महतीयं चरितार्थता ।

अस्य प्रकाशनविषये श्रद्धां त्वराञ्च प्रदर्शितवते दिल्लीदेववाणी-परिषदो महासचिवाय मम सुहृद्वराय डा० रमाकान्तशुक्लाय धन्यवादान् निवेदयामि ।

१०-३-१९८३ ई० —सी० आर० स्वामिनाथ:
५/३० W.E.A. करोलबाग,
नयी दिल्ली ११०००५

FOREWORD

It is an endearing feature of our Hindu modes of worship that we offer to the Deity the same honours as we show to the King. It seems to bring God so much nearer to us. The awakening of the Lord in the early hours of the morning is done to the singing of hymns of praise with the refrain 'Tava Suprabhatam'. Those words, meaning, 'may the day dawn auspiciously for Thee' usually wind up a verse which is in reality a glorification of a particular victory of the Lord; in one incarnation or other, over the forces of evil. For a secular parallel see Sumantra's praise of Dasartha on the morning which was to see Rama's going into exile. All unconscious of what was impending, Sumantra said :

इन्द्रमस्यां तु वेलायामभितुष्टाव मातलिः ।
सोऽजयद्दानवान् सर्वांस्तथा त्वां बोधयाम्यहम् ॥

The most famous of these 'Suprabhatam' compositions is the Sri Venkateswara Suprabhatam which thanks to its literary beauty, and its rendering for the gramophone companies by distinguished musicians is heard in practically every household in the mornings.

Quite a number of other Suprabhatams, though not so popular, have of recent years, been composed or publicised by devotees in praise of their favourite deity, usually one of the six who figure in the Panchayatana Poojah. Dr. C. R. Swaminathan, an eminent scholar and student of philosophy, with a gift for poetry, has struck out a new path for himself in singing in fifty verses the praises of the divine twins Nara and Narayana, who incarnated as the sons of Dharma, born of Murthi, Daksha's daughter, who, almost as soon as they were born, went to Badrikashrama in the inner Himalayas to practice eternal tapas for the welfare and enlightenment of mankind. This was a rather unique incarnation since it was in no way concerned with action (Karma). Naishkarmyasiddhi is the gateway to libration according to the Advaitin. It is the perpetual inspiration accorded by their presence, example and teaching that has always drawn hundreds of highly evolved souls to Badari. Dr. Swaminathan pays fitting tribute to the preceptors of Advaita from Brahma and Vasistha down io H. H. Sri Chandrasekharendra Saraswati Poojyapada, as faithful to the tradition of Nara-Narayana. The Lord, when he was about to return to Vaikuntha, told his favourite disciple Uddhava to go and spend the rest of his life in

tapas there. From this it should be obvious that the path of devotion was not excluded from the Badari discipline.

It is therefore no wonder that, while many other Puranas pay reverence to the Nara-Narayana incarnation, it is the Srimad-Bhagavatam that brings out its full glory. And Dr. Swamiuathan has in weaving his garland of verses made the fullest use of the references in it to this avatara. Of incidents, there are only two- the story of hof Indra, alarmed for his primacy, which he thought might be jeopardised by their austerities, sent the most beautiful Apsarases of his court, accompained by every other celestieal temptation, to distract their minds. But Narayana., with a laugh, showed Indra's minions, the women in attendance on him in his Ashrama. And they so surpassed Indra's attendants in beauty and excellenee of every kind that sank into themselves for very shame. And the Rishi heaped coals of fire on their head by inviting them to take with them as a present to their master one of those women whom they regarded as outstanding. They took Urvasi with them and told Indra of what had happened, and Indra was overawed. The one other incident of which, Dr. Swaminathan rather inexplicably makes no use, is described in the Twelth Skanda

where Narayana brings about an avantara-pralaya to demonstrate to Markandeya the nature of the Lord's Maya. But Dr. Swaminathan brings out in nine verses (39-47) the essence of that Maya and the paradox at the heart of this incarnation; the identity in differerence of Nara and Narayana, the eternal inseparable twins. The Bhagavata (Sk. XI, Ch. 4) says, "He, the first of sages, ever established in peace, taught by example and precept, the way of self-realisation which is characterised by the cessation of all activities, and remains practising it to this day, while the formost of sages serve at His feet". (XI, IV 6). In verses 39 to 46 Cr. Swaminathan brings out with clarity and beauty the unique features of this avatar.

अन्यावतारसमये विविधक्रियाभि-
धर्मस्थितिर्विरचिता किमु तत्र चित्रम् ।
निष्कर्मणैव जगतीमिह पासि विष्णो
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ।।४१।।

Kalidasa described Vishnu as 'स्वपतो जागरूकस्य'. In the same spirit, Dr. Swaminathan, while identifying all the incarnations as they essentially one, Nara-Narayan incarnated later as Krishna and Arjuna) not only devotes 8 verses to the well-known Dasavataras, he recalls the Chiranjivis and the great devotees of all

time who sit at the feet of Narayana. He relevantly brings in other episodes in the Bhagvata, such as the Hamsa Gita. He emphasises the specail significance of the avatara for the Advaitin, and refers to the great part played by Sri Sankara Bhagavatpada in establishing the modes of worship in the temple. That the Lord was pleased to create the Tapta Kunda(hot spring) out of compassion for his southern worshippers is, even if it may be apocryphal, heart-warming. Infinite is the Lord's mercy. and Swaminathan's poem which commends itself by its simple and flowing style is to be welcomed as another garland from the South laid reverently at the feet of the Lord.

5th July, 1980, N. Raghunatha Iyer

श्रीः

व्याख्याकर्तुः ग्रन्थकारं प्रति पत्रम्

श्री स्वामिनाथमहाभाग,

श्रीवदरीशस्य भगवतः कृपया भवतः 'सुप्रभातम्', स्वस्तिः स्वस्ति च भवते भवन्तु। इदं भवत्पुस्तकं मया ज्वरग्रस्तेन भवत्प्रेषितवाहकद्वारा लब्धम्। तस्मिन्नेव काले मया श्रीवदरीशं ध्यायता अस्य व्याख्या लिखिता। अपूर्वोऽयं ग्रन्थः। अत्र खलु व्याकरणस्यावज्ञा न कृता। काव्यरचना-शैली छन्दःशैली च नोज्झिता, दर्शनानि च सांख्ययोगन्याय मीमांसाद्वयरूपाणि न रचनावेगेन विस्मृतिपथं नीतानि।

अहं मन्ये, अस्य स्तोत्रस्य पाठेन अवश्यमेव श्रीवदरीश-कृपया स्तोत्रपाठकानां सदैव सुप्रभातं भविष्यति इति।

—रघुनाथशर्मा

२-१२-८२
'मातृसदनम्', सेमरी,
छाता, बलिया

श्रीः

श्रीगणेशाय नमः। श्रीनरनारायणाभ्यां नमः। श्रीगुरुभ्यो नमः।

कार्यकारोपाह्व-डा०शास्त्रपुरम् रामकृष्णस्वामिनाथ-
विरचितम्

श्रीबदरीशसुप्रभातम्

(पं० रघुनाथशर्मकृतव्याख्योपेतम्)

श्री बदरीशं नत्वा गत्वा, मनसा च तद्धाम।
श्री रघुनाथः कुरुते, कुतुकी व्याख्यां प्रबन्धेऽस्मिन् ॥१॥
बदरीशकृतिनिवेशनमप्यवधूतं वचोऽस्मदादीनाम्।
रथ्योदकमिव गङ्गाप्रवाहपातः पवित्रयति ॥२॥

अस्मिन् स्तोत्रे पञ्चाशत् पद्यानि, सर्वेषु पद्येषु च परिकरालंकारः। तेनैतत् स्तोत्रम्—'अमरुककवेरेकं पद्यं प्रबन्धशतायते' इति कस्यचित्कवेः सूक्तिं स्मारयति। अत एवैनद् दुरवगाहतया व्याख्यामपेक्षते। अतो मया—"एतद्ध्यातुरचित्तानामिच्छतामकुतो भयम्। मयाम्भोधिप्लवो दृष्टो हरिचर्यानुवर्णनम् ॥" इति भागवतीये पद्य श्रद्धावता एवैनद् व्याख्यायते। तत्रेदमाद्यं पद्यम्—

लम्बोदरो[1] निजरदं सहसा विपाट्य
व्यासोक्तभारतकथां लिखितुं प्रवृत्तः !
विघ्नानपोह्य, भगवन् बदरीगुहास्थ[2] ।
विघ्नेश ! मे दिश शुभं, तव सुप्रभातम् ॥१॥

लम्बोदर इत्यादि—व्यासेन भारतकथालेखाय प्रार्थितो यो लम्बोदरो लम्बोदरत्वादेव तद्भारासहिष्णुरन्यत्रस्थितां लेखनीमानेतुं निर्मातुं वाऽन्यत्र गन्तुमालस्यादनिच्छन् निजरदं सहसा विपाट्य तस्यैव लेखनीं निर्माय कालपर्ययभयाद् व्यासोक्तां व्यासेन वक्तुमारब्धाम् । आदिकर्मणि क्तः । भारतकथां लिखितुं प्रवृत्तः । स त्वं हे भगवन्—अणिमादिक षड्विधैश्वर्यसंपन्न, बदरीगुहास्थ—अनेन बदरीशस्य संनिधानेन बदरीशस्य विष्णोरवताररूपतया च बदरीशे स्नेहः सूच्यते । विघ्नानपोह्य मे शुभं दिश बदरीशस्तवलेखनसामर्थ्यरूपं मङ्गलं ध्यानान्मम प्रत्यहं सुप्रभातं भवतु । लम्बोदरो विष्णोरवतार देहि[1]। तव इति पौराणिकी कथा ब्रह्मवैवर्ते ब्रह्माण्डपुराणे वा द्रष्टव्या ॥१॥

---

१. विघ्नविनाशाय श्रीगणेशः प्रार्थ्यते । लकारः गणपतेः बीजाक्षरम् ॥
२. 'गणेशगुहा' इति बदरीशमन्दिरस्य नातिदूरे काचन गुहा वर्तते ॥

[1]पद्मोद्भवप्रमुखशक्तिवसिष्ठमुख्यैः
श्रीशङ्कराख्ययतिना च तदीयशिष्यैः
[2]आचन्द्रशेखरयतीन्द्रमुपास्यमान
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥२॥

पद्मोद्भवप्रमुखेति—अत्र ऋषिभिरित्यध्याहार्यम् । शक्तिवसिष्ठमुख्यैरित्यत्र क्रमव्यत्ययः छन्दोऽनुरोधात् । व्याकरणानुरोधाच्च । तथाहि—शक्तिवसिष्ठपदयोर्द्वन्द्वे शक्तिपदमल्पाच्तरम् । पद्मोद्भवादिभिरुपास्यमानेति विशेषणेन भगवतो नारायणस्य बदरीशवेषस्य सम्प्रदायप्रवर्तनद्वारा विद्यागुरुत्वं धर्मरक्षकत्वञ्च सूच्यते । तदेतच्छ्रुतं श्रुतिषु —"एष सेतुर्विधरण एषां लोकानामसम्भेदाय" इति । श्रिया नाथ्यते इति कर्मणि घञि संबोधनम् । न तु श्रियं नाथते इति । बाहुलकात् कर्मणि घञ् । एतेन सर्वोपास्यायाः श्रिय उपास्यत्वं भगवतो व्यज्यते । बदरिकेश्वरोऽपि श्रीनाथ इति विरोधाभासः । तव स्मरणात् मम सुप्रभातं भवतु इति सपदाध्याहारं व्याख्येयम् ॥२॥

---

१. 'नारायणं पद्मभुवं वसिष्ठं शक्तिं च तत्पुत्रपराशरं च' इत्यादिश्लोकोक्ता गुरुपरम्परा ग्रन्थादौ स्मर्यते ॥

२. श्रीकाञ्चीकामकोटिपीठाधीश्वराः श्रीचन्द्रशेखरेन्द्रसरस्वतीश्रीचरणाः भगवत्पादादारभ्य ६८ तमा आचार्याः ॥

पक्षीन्द्रवाहन पराशरपुत्रवन्द्य
पूर्णावतार पुरुषोत्तम पार्थबन्धो !
पद्मायताक्ष पवनात्मजसेविताङ्घ्रे
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥३॥

पक्षीन्द्रवाहनेत्यादि—पक्षीन्द्रवाहनेति संबोधनेन द्रुतं मम संनिधेहि इति व्यज्यते। पराशरपुत्रवन्द्येति संबुद्ध्या सर्ववेदवन्दनीयत्वं सर्वपुराणवन्द्यत्वं किं बहुना सर्वसंस्कृतवाङ्मयवेद्यत्वं बदरीशस्य भगवतः सूच्यते। तदुक्तं गीतासु—"वेदैश्च सर्वैरहमेव वेद्य" इति। वेदव्यासेति नाम्ना व्यासोपज्ञं वेदवित्त्वमिति सूच्यते। 'अष्टादश पुराणानां कर्त्ता सत्यवतीसुत' इति च पौराणिकं वाक्यमपि अत्रार्थे पूर्वनिर्दिष्टे मानम्। पूर्णावतारेति विशेषणेन सर्वशक्तिसंपत् तया च सर्वार्थदातृत्वं व्यज्यते। पुरुषोत्तमेत्यनेन जगत्पालकत्वं कारुण्यञ्च सूच्यते। 'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदीरितः। यो लोकत्रयमाविश्य विभर्त्यव्यय ईश्वर" इति गीता। पार्थबन्धो इत्यनेन भक्तपरवशत्वं सूच्यते। पद्मायताक्षेत्यनेन अक्रूरा दृष्टिः सौम्यत्वञ्च सूच्यते। पवनात्मजसेविताङ्घ्रे इत्यनेन महामहिमत्वं सूच्यते। शेषं पूर्ववत् ॥३॥

नारायणाखिलगुरो नरकान्तकारिन्
नागेन्द्रतल्प नरनारदगीतकीर्ते !
नाभीसरोजभवसंस्तुत कैटभारे !
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥४॥

नारायणेति "आपो नारा इति प्रोक्ता आपो वै नरसूनवः। तस्य ता अयनं पूर्वं तेन नारायणः स्मृतः।" इति स्मृतिः। यत आपो नरस्य परमपुरुषस्य सूनवः-पुत्राः-रेतोरूपत्वात्। "रेतोधाः पुत्र उन्नयति नरदेवयमक्षयादि"ति स्मृतेश्च। ता जगतो गर्भरूपा आपस्तस्य भगवतः पूर्वं सृष्टेः प्राक्—"अप एव ससर्जादौ" इति स्मृतेः। अयनम् आश्रयः तेनासौ नारायणः स्मृतः। बदरीशो नारायण इति पुराणेष्वपि प्रसिद्धम्। एतेन नारायणस्य जगत्स्रष्टृत्वमुक्तं भवति। तदुक्तमुदयनाचार्यैः—"स्वाम्यं यस्य निजं जगत्सुजनितेष्वादौ ततः पालनं, व्युत्पत्तेः करणं हिताहितविधिव्यासेधसंभावनम्। भूतोक्तिः सहजा कृपा निरुपधिर्यत्नस्तदर्थात्मकः, तस्मै पूर्वगुरूत्तमाय जगतामीशाय पित्रे नमः॥" इति। अखिलगुरो इत्यनेन नारायणपदार्थ एव स्फुटीकृतः। अत्र गुरुत्वं पितृत्वरूपं द्रष्टव्यम्। तदुक्तं गीतासु—"पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान्। न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभावः।" इति। नरकान्तकारिन् इत्यत्र नरको दैत्यः पापिनां यातनास्थानञ्च

उभयोरन्तकारिन् । तदुक्तं भागवते—"नारायणेति म्रियमाण इयाय मुक्ति"मिति । नरकदैत्यनिधनकथा तु पुराणेषु द्रष्टव्या । एतेन भगवतः करुणाभरणत्वं भगवन्नाममाहात्म्यञ्च सूच्यते । नागेन्द्रतल्पेत्यनेन भगवतो दुरधिगमत्वं सूच्यते । नरनारदगीत-कीर्ते इत्यनेन भगवतो भक्तिमात्रलभ्यत्वं सूच्यते । तदुक्तं गीतासु—"भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन । ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुञ्च परन्तप" इति । नाभीसरोजभव-संस्तुत इत्यनेन "पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि" इति श्रुत्यर्थः सूच्यते । कैटभारे इत्यस्य—कीटानां समूहः कैटं तद्वद्भाति इति कैटभः तस्य दैत्यविशेषस्य अरिः इत्यर्थः । अनेन भगवतोऽलौकिकः पराक्रमः सूच्यते । शेषं पूर्ववद् बोद्धव्यम् ॥४॥

उर्वीपते उरुपराक्रम कर्मसाक्षिन्
[1]ऊरूद्भवाद्युतिजितामरनारिगर्व !
उत्तुङ्गशृङ्गतुहिनाचलनित्यवासिन्
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥५॥

उर्वीपते इत्यनेन समुद्रमग्नाया उद्धारः सूच्यते। उरुपराक्रम इत्यनेन हिरण्याक्षवधो व्यज्यते। कर्मसाक्षिन् इत्यनेन यज्ञाधिष्ठातृत्वं व्यज्यते तच्च वराहरूपस्य भगवतः श्रुतिषु श्रुतम्। ऊरूद्भवा उर्वशी तस्या द्युत्याजितोऽमरनारीणाममरवल्लभानां गर्वो येन तत्संबोधनम्। अत्र-नारिपदे-न अरयः सपत्न्यो यासामिति षष्ठ्यर्थे बहुव्रीहिः। अत्र नञर्थे न पदम्। अत्र नारय इत्यस्य वल्लभा इति फलितार्थः। अत्र भगवतः स्वाधीनत्वमविकारित्वञ्च सूच्यते। उत्तुङ्गशृंगतुहिनाचल नित्य वासिन् अनेन भगवतो द्वन्द्वसहत्वं सूच्यते। तदुक्तं गीतासु—"यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ। समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते।" इति। शेषं पूर्ववत् ॥५॥

---

१. श्रीनारायणस्य तपोभङ्गाय देवेन्द्रप्रेषिताः रम्भादयः भगवदूरूद्भवामुर्वशीं दृष्ट्वा लज्जावनताः समभूवन्निति पौराणिकी कथा ॥

प्रह्लादमुख्यनिजभक्तजनाभिवन्द्य
प्रस्थानभेदशतगम्य परात्परेश !
पापौघकाननदवानल पद्मनाभ
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥६॥

प्रह्लादमुख्यनिजभक्तजनाभिवन्द्य इत्यनेन भगवद्भक्तानामेव भगवद्गुणगणवर्णने सामर्थ्यं सर्वज्ञत्वान्नान्येषामिति सूचितम् । तथा हि—भक्तानां मनसि भगवान् सततं संनिहितो भवति तेन भगवद्गुणगणस्तेषां नित्यं परिचितो भवति इति भगवद्गुणास्तैरेव वर्णयितुं शक्या नान्यैरिति भावः । अत्राभिवन्दतिः स्तुत्यर्थे । प्रस्थानभेदशतगम्य इत्यनेन मार्गभेदेऽपि प्राप्यो भगवानेक एवेति गम्यते । तदुक्तं महिम्नःस्तोत्रे—"नृणामेको गम्यस्त्वमसि पयसामर्णव इति ।" हरिहरभेदाभावात् । हरिहरभेदं कलयति कश्चन मूढो विना शास्त्रमिति च । परात्परेश इत्यनेन भगवतो निरुपाधिकं स्वरूपं सूच्यते । तथाहि—परात्परत्वेनाभिमतात् महत्तत्त्वोपाधिकात् ब्रह्मणोऽपि परः प्रकृत्युपाधिकः--तस्यापि ईशः संनिधानेन कालादृष्टसहकृतेन अयस्कान्तवन्नियन्ता । पापौघकाननदवानल इत्यस्य स्मरणकीर्तनवन्दनादिद्वारा इति शेषः । पद्मनाभ इत्यनेन एक संबन्धि ज्ञानमपरसंबन्धिस्मारकमित्युक्तदिशा ब्रह्मवेदयोः सृष्टिद्वारा जगत्सृष्टिप्रवर्तकेति व्यज्यते । श्रुतञ्चैतत् श्रुतिषु—"यो ब्रह्माणं विदधाति पूर्वं यो वै वेदाँश्च प्रहिणोति तस्मै" इति । शेषं पूर्ववत् ॥६॥

भागीरथीतटविहार भवाब्धिपोत
भाग्यस्वरूप भुवनस्य भयापहारिन् !
भीमाभिवन्द्य भगवन् भुजगेन्द्रशायिन्
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥७॥

भागीरथीतटविहारेति—अनेन सर्वपाविन्या भागीरथ्या भगवत्पादप्रभवत्वं सूच्यते। भवाब्धिपोत इत्यनेन भवाब्धेरगाधत्वेन भीषणजन्त्वाश्रयत्वेन च दुस्तरत्वं भगवतश्च स्मृतिमात्रेण तदुत्तारकत्वं बोध्यते। भाग्यस्वरूपेत्यनेन कर्मसाक्षित्वं कर्मफलदातृत्वञ्च सूच्यते। भुवनस्य भयापहाहिन् इत्यनेन भगवतः श्रीबदरीशस्य सत्त्वप्रधानत्वेन जगतः स्थितिहेतुत्व व्यज्यते। भगवन् भीमाभिवन्द्य इत्याभ्यां भगवतोऽष्टविधसिद्धिसंपन्नत्वेन भीमानां मधुकैटभादीनामपि स्तुत्यत्वं बोध्यते। भुजगेन्द्रशायिन् इत्यनेन असंगत्वं सूच्यते। "असंगो नहि सज्जते" इति श्रुतेः। शेषं पूर्ववत् ॥७॥

[1]श्रीशङ्कराख्ययतिराजकृतां व्यवस्थां
स्वाराधनाय महितामनुमन्यमानः ।
शिष्टावनैकनिरतः श्रितपारिजातः
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥८॥

स्वाराधनाय श्रीशङ्कराख्ययतिराजकृतां महितां (प्रशस्ताम्) व्यवस्थाम् अनुमन्यमानः (स्वीकुर्वाणः) त्वं शिष्टावनैकनिरतः सन् शिष्टावनसाधनसंपत्तये । श्रितपारिजातो बभूविथ एवंभूत हे श्रीनाथ बदरिकेश्वर तव स्मरणकीर्तनादिना मम सततं सुप्रभातं भवतु । इति योजना । अयं भावः । केरलीयनम्पूतिरीद्विजा एव बदर्यां रावल् इति नाम्ना प्रसिद्धाः श्रीबदरीशस्य पूजां कुर्वन्ति । स च तैः क्रियमाणो भगवतो बदरीशस्य वरिवस्याप्रकार आदिशङ्कराचार्येण व्यवस्थापितः इति हि परम्पराप्राप्ता लोकप्रसिद्धिः श्री शङ्करदिग्विजयग्रन्थेषु च वर्तते ॥८॥

---

१. आदिशङ्करभगवत्पादैः वरिवस्याक्रमो निर्धारित इति शङ्करविजयग्रन्थेषु वर्तते ॥

[1]नम्पूतिरीरचितया वरिवस्यया यः
प्रीतो भवन्ननुदिनं नवतामुपैति ।
[2]नाभागजाभयद हे प्रणतार्तिहारिन्
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥९॥

नम्पूतिरीरचितया इति—यः श्री बदरीशो नम्पूतिरीद्विज-रचितया वरिवस्यया प्रीतो भवन् अनुदिनं प्रतिदिनं नवतामुपैति इति योजना । अत्र मानन्तु - नम्पूतिरीब्राह्मणकर्तृकपूजारम्भ-दिनमारभ्य इदानीं यावत् बदरीशप्रतिमाया अजीर्णत्वमपरि-वृत्तिमत्त्वं च । यदा च कलिप्रभावेण वरिवस्यायां वैगुण्यं भविष्यति तदा प्रतिमाया जीर्णत्वं भविष्यति परिवर्तनञ्च अपे-क्षिष्यते । नाभागजाभयद हे प्रणतार्तिहारिन् इत्यत्र संबोधनद्वये हेतुहेतुमद्भावात् काव्यलिङ्गम् । यतः प्रणतार्तिहारित्वं भग-वतोऽतो नाभागजाभयदत्वमिति योजना । शेषं पूर्वतत् ॥९॥

---

१. केरलीयनम्पूतिरीद्विजा एव बदर्यां रावल् इति नाम्ना पूजां कुर्वन्ति ॥
२. नाभागजः—अम्बरीषः ॥

तत्त्वंपदार्थ तरणे भवसागरस्य
तापत्रयोद्धरणदक्ष तमालकान्ते !
तर्कैरगम्य तरुणाम्बुदकोमलाङ्ग
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥१०॥

तत्त्वंपदार्थेत्यादि । हे तत्त्वंपदार्थ हे भवसागरस्य तरणे नौकारूप, अत्र काव्यलिङ्गमलंकारः । संबोधनान्त पदार्थयोर्द्वयोः परस्परं हेतुहेतुमद्भावसत्त्वात् । यतस्त्वं तत्त्वं पदार्थरूपः, अतो भवसागरस्य तरणिः । तत्त्वं पदार्थयो-रैक्यज्ञानेन भवबन्धमोक्षो भवतीति श्रुतिषु तदनुगते वेदान्त-शास्त्रे च प्रसिद्धम् । हे तमालकान्ते हे तरुणाम्बुदकोमलाङ्ग इति संबुद्ध्यन्तेन पदद्वयेन तापत्रयोद्धरणदक्षत्वं समर्थ्यते । तर्कैरगम्य इत्यनेन उपनिषन्मात्रवेद्यत्वं सूच्यते । तदुक्तं श्रुतौ— 'तं त्वौपनिषदं पुरुषं पृच्छामि' इति । शेषं पूर्ववत् ॥१०॥

नारयणीप्रिय नताभय दीनबन्धो
नामावशेषितहिरण्य नृसिंहरूप !
नामावलीजपनतुष्ट नरावतार
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥११॥

नारायणीप्रियेत्यत्र नारायण्याः प्रिय इति षष्ठीतत्पुरुषः । न तु नारायणी प्रिया यस्येति बहुव्रीहिः । तथा सति प्रियनारायणिरिति स्यात् । किञ्च—'न मे द्वेष्योऽस्ति न प्रिय इति गीता विरोधोऽपि स्यात् । षष्ठीतत्पुरुषे स्वपदार्थप्राधान्यमपि । नारायणी नारायणसमानाकारा नारायणस्य शक्तिः । तदुक्तं सप्तशत्याम् - "यस्य देवस्य यद्रूपं यथाभूषणवाहम् । तद्वदेव हि तच्छक्तिरसुरान् योद्धुमाययौ" इति । नताभय इत्यत्र नतानामभयं यस्मादिति पञ्चम्यर्थे व्यधिकरणपदो बहुव्रीहिः । नदीरयो यथा अनम्राणां समुद्धर्ता नम्राणाञ्चाभयदस्तथा भगवानिति भावः । दीनबन्धो इत्यत्र दीना एव बन्धवो यस्य न तु उद्धता इति बहुव्रीहिः । दीनानां बन्धुरिति षष्ठीतत्पुरुषो न स्वार्थप्रधानोऽपि स्वीकार्यः । अर्थानुरोधात् । नाम्नाऽवशेषितो हिरण्यो हिरण्यकशिपुर्येनेति तृतीयान्तार्थेऽन्यपदार्थे बहुव्रीहिः । नाम्नोऽवशेषितौ हिरण्यौ हिरण्याक्षहिरण्यकशिपू येनेति संभवन्नपि विग्रहो नात्राश्रयितव्यः । नृसिंहरूपेतिपदानुरोधात् । नामावलीजपनतुष्ट इत्यनेन कलौ केशवकीर्तनादिति पद्यपादार्थः सूच्यते । नरावतार इत्यत्र नरोऽवतारो यस्येति बहुव्रीहिः, अर्थानुरोधात् । न तु नरस्यावतार इति महिम्नो ह्रासात् । शेषं पूर्ववत् ॥११॥

[1]भक्तोत्तमोद्धवसमुद्धरणे प्रवृत्ता
ज्ञानामृतामरधुनी शुकसेव्यमाना ।
[2]नन्देव नन्दयति या भणितिस्त्वदीया
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥१२॥

भक्तोत्तमोद्धवसमुद्धरणे प्रवृत्ता इति भणितेरमरधुनीत्वारोपे हेतुः ज्ञानामृतामरधुनी इत्यत्र ज्ञानमेवामृतं जलमिति विग्रहः । शुकसेव्यमाना—शुकेन साक्षात् तच्छिष्यैश्च तद्द्वारा सेव्यमाना । छत्रिणो यान्तीतिवत् शुकपदस्य शुकघटितसमुदाये लक्षणा । नन्देव अलकनन्देव । या भणितिस्त्वदीया इत्यत्र तस्याः प्रवर्तक इति शेषः । शेषं पूर्ववत् ॥१२॥

---

१. उद्धवाय बदर्याश्रमे नारायणेन ज्ञानोपदेशः कृत इति भागवतस्य ११ स्कन्धगता कथा स्मर्यते ।

२. नन्देव - अलकनन्दाप्रवाह इव ज्ञानोपदेशप्रवाह इत्यर्थः ॥

व्यासप्रणीतनवनाटकसूत्रधार
वेदान्तवेद्य वरदाभयहस्त विष्णो !
[1]विश्वंपदाख्य विजयप्रिय विश्वमूर्ते
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥१३॥

व्यासप्रणीतनवनाटकसूत्रधार—व्यासप्रणीतं यन्नवनाटकं भारताख्यं तस्य सूत्रधार, वेदान्तवेद्य, श्रुतिषु औपनिषदत्वेन श्रवणात् । वरदाभयहस्त इत्यत्र वरदोऽभयश्च हस्तौ यस्येति बहुव्रीहिः । विष्णो इत्यनेन व्यापकत्वं सूच्यते । विश्वंपदाख्य इति विश्वमितिपदेनाख्यायमानेत्यर्थः । विजयप्रिय इत्यत्र षष्ठीतत्पुरुषः । विजयप्रिय सारथिरित्यन्यत्र स्मरणात् । विश्वमूर्ते इत्यनेन विश्वस्रष्टृत्वं व्यज्यते । शेषं पूर्ववत् ॥१३॥

---

१. विष्णुसहस्रनामस्तोत्रे प्रथमं विश्वमिति भगवन्नाम ॥

[1]यो दाक्षिणात्ययतिपुङ्गवपार्षदानां
शीताम्भसि स्नपनखेदमपाकरिष्णुः ।
तप्तोदकोद्गमनमारचयद्धिमाद्रौ
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥१४॥

यो दाक्षिणात्ययतिपुङ्गवेत्यादि—दाक्षिणात्ययतिपुङ्गवेति भगवतः श्रीशङ्कराचार्यस्य परिचायकम् । गुरोः साक्षान्नामग्रहणेऽपराधात्--तदुक्तम्--"आत्मनाम गुरोर्नाम नामातिकृपणस्य च । श्रेयस्कामो न गृह्णीयाज्ज्येष्ठापत्यकलत्रयोः" इति। पार्षदानामेव न तु यतिपुङ्गवस्येति सावधारणं वाक्यम् । यतिपुङ्गवस्य हिमाद्रौ शीताम्भसि स्नानसामर्थ्यात् । अनेन पद्येन भगवतो बदरीशस्य प्राकाम्यसिद्धिः सूचिता । शेषं पूर्ववत् ॥१४

१. शङ्करभगवत्पादाः यदा शिष्यैस्सह बदरिकाश्रमं जग्मुः, तदानीं शीताधिक्येन स्नातुमक्षमाणां कृते भगवत्पादप्रार्थनया तप्तकुण्डाः प्रादुरभूवन्निति कथाऽत्र स्मर्यते ।

[1]द्रौण्याञ्जनेयकृपनारदजाम्बवद्भि-
राराधितः प्रतिदिनं जितमृत्युपाशैः ।
यक्षेशदिश्यधिवसन् तपसे विशालां[2]
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥१५॥

द्रौण्याञ्जनेयेत्यादि—अनेन पूर्वार्धेन मृत्युपाशजये भगवदाराधनमेव हेतुरिति सूचितम् । विशालामित्यनेन बदरिकाश्रमस्थास्तापसा वृक्षमूलिका एव न तु तेषां पर्णशालाः सन्ति इति सूच्यते । द्रौण्याञ्जनेयेत्यादौ पदसमूहे प्रथमे पादे कालक्रमव्यत्ययश्छन्दोऽनुरोधात् लक्षणहेत्वोः क्रियाया इति निर्देशेन पूर्वं निपातप्रकरणस्यानित्यत्वाच्च । तपसे यक्षेशदिशि विशालामधिवसन् इत्यनेन असंगत्वाय समाधये च तपःस्थानस्य दुर्गमत्वमावश्यकमिति सूच्यते । यक्षेशदिशश्च पर्वतैः काननैर्हिमान्या च दुर्गमत्वमस्त्येव इति भावः ॥१५॥

---

१. प्रातस्स्मरणीयाश्चिरंजीविनोऽत्र स्मर्यन्ते ॥

२. 'विशाला' इति बदरिकाश्रमस्य नामान्तरम् ॥

[1]त्वद्वक्त्रनिस्सृतविवेकसुरापगायां
त्वत्पादनिर्गतभगीरथभाग्यधुन्याम् ।
यातु प्रयागमिलनं तव नेत्रकान्तिः
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥१६॥

त्वद्वक्त्रनिःसृतविवेकसुरापगा यमुनारूपा गीता । श्यामवक्त्रनिःसृतत्वेन श्यामत्वात्, दैवसंपत्संपन्नानामेव गीतायामधिकार इति यमुनारूपा गीताऽपि सुरापगा । द्वितीय-पादार्थस्तु स्पष्टः । बदरीशधामसविधे अलकनन्दा वर्तते या प्रवहन्ती क्रमेण सागरं प्रविष्टा । भगवतो नेत्रकान्तिः सरस्वती । भक्तानां दृश्यत्वात् अभक्तानाञ्चादृश्यत्वात् । शेषं पूर्ववत् ॥१६॥

---

१. भगवद्गीता ।

रम्भादिदेववनिताहृदयानुरागं
गङ्गाजलानि चलवीचिरवैस्त्वदीये ।
कर्णे वदन्त्यतिभयादिव चोर्वशीतः
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥१७॥

गङ्गाजलानि चलवीचिरवैस्त्वदीये कर्णे उर्वशीतः—उर्वशीं द्वारीकृत्य ल्यब्लोपे पञ्चमी; न तु साक्षात् अतिभयादिव रम्भादिदेववनिता हृदयानुरागं वदन्ति । शेषं पूर्ववत् ॥१७॥

भागीरथी निजजलैस्तव पादयुग्मे
पाद्यं समर्पयितुमेति दिवं विहाय ।
शीघ्रं स्वकृत्यमतिवाह्य यियासुरेषा
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥१८॥

भागीरथीनिजजलैरिति—इदं पद्यं "कलौ दशसहस्राणि विष्णुस्तिष्ठति मेदिनीम् । तदर्धं जाह्नवीतोयं तदर्धं ग्रामदेवताः" इति क्वाचित्कं पद्यं स्मारयति। अत्र पद्ये मेदिनीमित्यस्य आश्रित्य इति शेषः । ग्रामदेवतानां मेदिनीत्यागस्तु ग्रामे ग्रामेऽनुभूयत एव । जाह्नव्याः प्रवाहोऽपि शुष्यति वा दूषितो वा भविष्यति सद्य एव नात्र विलम्बः । भगवांस्तु भक्तिप्रियो गायतां नृत्यतां च भक्तानां शौचाचारहीनानामपि हृदये स्थास्यत्येवेतः परं पञ्चवर्षसहस्राणि । ततः परं भक्तिशून्येषु जनेषु सत्सु इतो यास्यति । शेषं पूर्ववत् ॥१८॥

[1]मत्स्याकृते श्रुतिसमुद्धरणैकदक्ष
मज्जन्महीध्रधरणे कमठावतार !
भूदार भूरिकृप यज्ञवराहमूर्ते
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥१९॥

मत्स्याकृते इति उद्देश्यम्, श्रुतिसमुद्धरणैकदक्ष इति विधेयम्। कमठावतार इति उद्देश्यम्। मज्जन्महीध्रधरणे इति विधेयम्। यज्ञवराहमूर्ते इति उद्देश्यम्। भूदारभूरिकृप इति विशिष्टं विधेयम्; न तु उभयं, वाक्यभेदात्। सोमेन यजेत इतिवत्। शेषं पूर्ववत् ॥१९॥

---

१. अष्टभिः श्लोकैः दशावताराः वर्ण्यन्ते ॥

कायाधवप्रिय हरे नरसिंहवेष
याच्ञाच्छलेन बलिदानवदर्पहारिन् !
मायावटो जितजगत्त्रय विश्वरूप
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥२०॥

कायाधवप्रिय इति कयाधुः प्रह्लादस्य माता, तस्या अयं कायाधवः। तस्येदमित्यण्। स प्रियो यस्य तत्संबोधनम्। "न मे द्वेष्योऽस्ति न प्रियः" इति वाक्यं बाधितुं नरसिंहवेष इत्युक्तं अनेन च इदं प्रतीयते—अहं भक्तपराधीनः, भक्त्या तुष्यति भक्तिप्रियो माधवः। अनेन पूर्ववाक्यस्य संकोचः। भक्ता मम-प्रियाः अभक्तास्तु न प्रियाः न द्वेष्याः। याच्ञाच्छलेन बलिदानव-दर्पहारिन्—अनेन इदं सूच्यते बलेर्धार्मिकत्वात् तस्य धर्म-माश्रितस्य बलेनाभिभवे धर्मातिक्रमः उपायान्तरसत्त्वे न युज्यते इति। मायावटो जितजगत्त्रयविश्वरूप इत्यनेन पूर्वोक्त एवार्थः समर्थ्यते। अत्र मायावटो इति उद्देश्यम्। जितजगत्त्रय विश्वरूप इति पूर्वोक्तपद्यतृतीयपादार्थ इव विशिष्टं विधेयम् विश्वरूप इत्यत्र विश्वं रूपे यस्य इति व्यधिकरणपदो बहुव्रीहिः। अत्र रूपशब्दः शरीरपरः। शेषं पूर्ववत् ॥२०॥

ब्रह्मण्य भार्गव विनाशितभूपवर्ग
भूदानतर्पितमहीसुर जामदग्न्य !
विप्रावतार परशुक्षतकार्तवीर्य
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥२१॥

ब्रह्मणि साधुः ब्रह्मण्यः तत्र साधुरिति यत् तत्सम्बुद्धौ ब्रह्मण्येति। परशुरामेण एकविंशतिकृत्वः दुष्टान् क्षत्रियान् हत्वा तेषां राज्यं यज्ञे यज्ञकारयितृभ्यो ब्राह्मणेभ्यः सम्प्रदत्तम् इति कथा ब्रह्मण्य इत्यनेन सूच्यते। भार्गव भृगोर्गोत्रापत्यं जामदगन्य इत्यनेनापि पूर्वोक्तैव कथा, विनाशितभूपवर्ग इति पदेनापि पूर्वोक्तैव कथा उच्यते। ब्रह्मण्य इत्यनेन या सूचिता कथा सा पूर्वव्यङ्ग्या कथैव भूदानतर्पितमहीसुर इत्यनेन पदेन उच्यते। विप्रावतार इत्यनेन भगवतो विष्णोः विप्रेषु परशुराम-रूपोऽवतारः इति सूचितम्। परशुक्षतकार्तवीर्य इत्यनेन कार्त-वीर्यार्जुनस्य सकलं दुर्वृत्तं सूच्यते। शेषं पूर्ववत् ॥२१॥

सीतापते दशरथात्मज सत्यसन्ध
सौमित्रिदाशपति[1]वन्द्य दशास्यशत्रो !
वातात्मजाश्रित विभीषणसेविताङ्घ्रे
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥२२॥

सीतापते इत्यादि--अनेन पद्येन वाल्मीकिरामायणस्य सकलकाण्डकथा सूच्यते। तथाहि दशरथात्मज इत्यनेन बालकाण्डस्य, सीतापते इत्यनेन जनकपुरस्य, सत्यसन्ध सौमित्रिदाशपतिवन्द्य इत्ययोध्यारण्यकाण्डयोः, दशास्यशत्रो इति युद्धकाण्डस्य, वातात्मजाश्रित इत्यनेन सुन्दरकाण्डस्य, विभीषणसेविताङ्घ्रे इत्यनेन चोत्तरकाण्डस्य कथा सूच्यते। शेषं पूर्ववत् ॥२२॥

---

१. दाशपतिः - गुहः ॥

संकर्षणाख्य भगवन् धृतनीलवस्त्र
[1]हालानुरक्त हलकृष्टकलिन्दकन्य ![2]
यो रेवतीप्रियतमो मुसली मुकुन्दः
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥२३॥

संकर्षणाख्य इत्यनेन—'गर्भसंकर्षणात्तं वै प्राहुः संकर्षणं बुधाः' इति भागवतीयं पद्यं स्मार्यते। भगवन् धृतनीलवस्त्र हालानुरक्त इति पदत्रयेण ध्यानाय भगवतः स्वरूपं प्रदर्श्यते। हलकृष्टकलिन्दकन्य इत्यनेन—यादवकन्याहरणकथा भागवतीया सर्वा स्मार्यते। यो रेवतीप्रियतम इत्यनेन ब्रह्मलोकं कन्याविवाहार्थं गतस्य रेवतस्य सर्वं वृत्तं स्मार्यते। मुसली मुकुन्द इत्यनेन ध्यानाय भगवतः स्वरूपं प्रदर्श्यते। मुखे कुन्दकुड्मलानीव दन्ता यस्येति बहुव्रीहिः। खकारस्य पृषोदरादित्वाल्लोपः। शेषं पूर्ववत् ॥२३॥

---

१. बलरामाभिमतो मदिराविशेषः ॥

२. भागवते दशमस्कन्धे अध्यायः ६५, श्लोकाः २३-३३ ॥

श्रीकृष्ण वृष्णिसुत कंसरिपो मुकुन्द
गोवर्धनोद्धरण रासविलोल शौरे !
पार्थप्रिय श्रितजनावन भीष्मवन्द्य
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥२४॥

श्रीकृष्ण इत्यनेन ध्यानाय स्वरूपं, वृष्णिसुत इत्यनेन वंशकथा, कंसरिपो इति चरितं, मुकुन्द इत्यनेन ध्यानाय स्वरूपं, गोवर्धनोद्धरण इत्यनेन चरितं, रासविलोल इति ध्यानाय स्वरूपम्, शौरे इत्यनेन गोत्रम्, पार्थप्रिय इत्यनेन पार्थे निरतिशयं वात्सल्यम्—निरतिशयं सख्यञ्च, श्रितजनावन इत्यनेन युद्धे पार्थस्य गोपवन्दीकृतराजगण, वन्दीकृतषोडशसहस्रस्त्रीगणानां, कंससंत्रस्तयदुकुलस्य च संरक्षणं सूच्यते। भीष्मवन्द्य इत्यनेन युधिष्ठिरराजसूये शिशुपालवधकथा सूच्यते। शेषं पूर्ववत् ॥२४॥

[1]दोग्धाऽसि वेदशिखराभिधकामदोग्ध्र्याः
यस्माज्जगद्गुरुरिति प्रथितो जगत्याम् ।
[2]वेद्यं च वेदकमसि प्रणवः पवित्रं
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥२५॥

हे बदरीश यस्माद् भवान् वेदशिखराभिधे वेदशिरसि वेदान्ते चरन्त्याः श्रुतिरूपायाः कामदोग्ध्र्या दोग्धास्ति गीतादुग्धरूपेण ततो भवान् जगत्यां जगद्गुरुः (जगत्पिता) इति प्रथितः। "पिताऽसि लोकस्य चराचरस्येति" गीता। पिता हि पुत्राणां रक्षार्थं गां पयो दोग्धि। वेद्यं च सर्वैर्वेदैस्त्वमसि, वेदकं सर्वस्य साक्षि च। वेत्ति सर्वमिति वेदकम्। प्रणवः ओङ्कारः (येन प्रणूयते प्रकर्षेण स्तूयते भगवान्) पवित्रम्-सूक्तम्। शेषं पूर्ववत् ॥२५॥

---

१. 'सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः' इत्यादिश्लोकः स्मर्यतेऽत्र ॥
२. 'वेद्यं पवित्रमोङ्कारः ऋक्साम यजुरेव च' इति भगवद्गीतायाम् ॥

बुद्धावतार दयया जितसर्वलोक
काले कलेस्तुरगवाहन कल्किरूपिन् !
खड्गप्रहारनिहताखिलदुष्टसङ्घ
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥२६॥

बुद्धावतार इति कथा स्मार्यते। दयया जितसर्वलोक इत्यनेन दयया सर्वलोकं वशीकृत्य अनधिकारिणो योगमार्गस्य सर्वाधिकारिकत्वेन योगमार्गोपदेशेन वेदे तेषामनधिकारात् वेदान् विनिन्द्य तान् तेभ्यो निवर्त्य समुद्दधार इति व्यज्यते। काले कलेस्तुरगवाहन कल्किरूपिन् इति ध्यानाय स्वरूपं वर्ण्यते। 'कर्को धवल घोटकः' इति कोशः। रलयोरभेदः। खड्गप्रहार निहताखिलदुष्टसङ्घ इत्यनेन चरितं वर्ण्यते। शेषं पूर्ववत्।२६।

[1]श्रीनारदः परमभागवतोऽत्र भूमन् !
सावर्णये परमहंसतनुं भवन्तम् ।
निर्वर्णयत्यनुदिनं नरदेवयुग्मं
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥२७॥

श्रीनारदः—नराणां समूहं नारं द्यति खण्डयति विभाजयति वैरोत्पादनेद इति नारदः श्रिया ब्राह्म्या लक्ष्म्या युक्तो नारदः अत्र जगति परमभागवतत्वेन प्रसिद्धः । हे भूमन् सर्वतो विपुलः स नारदः सावर्णये मनवे अनुदिनं परमहंसतनुम्—प्रकृष्टहंसपक्षिरूपम्—ऋषीणामुपदेशाय ब्रह्मविद्याया गुह्याया ऋषीणामेव बोधो यथा स्यान्नतु अन्येषामिति मत्या हंस-पक्षिरूपम्—भवन्तम्, नरदेवयुग्मं नरनारायणरूपं निर्वर्णयति निरूपयति इति पद्यार्थः । अत्र सावर्णिमनुकथा, सावर्णिनारद-संवादः, मुनीनां हंसस्य संवादः, नरनारायणचरितमिति सर्वं सूच्यते । शेषं पूर्ववत् ॥२७॥

---

१. भागवते पञ्चमस्कन्धे अध्यायः १९, गद्यं० १० ॥

देवर्षयोऽपि यमसक्तविविक्तसाक्षी-[1]
त्याद्यं पुमांसमनघं मुनिमप्रमेयम् ।
संकीर्तयन्त्यनुदिनं प्रतिबोधरूपं
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥२८॥

देवर्षयोऽपि यं भवन्तं महामहिमसम्पन्ना असक्त इति, विविक्तसाक्षीति, आद्यं पुमांसम्, अनघम्—अविद्यादिदोषशून्यम्, अप्रमेयं प्रतिबोधरूपम्, मुनिं कपिलमनुदिनं संकीर्तयन्ति स त्वमिति पद्यार्थः । असक्त इति—असंगो नहि सज्जते इति श्रुतेः विविक्तसाक्षी इति, स्वयं विषयेभ्यो विविक्तो भिन्नोऽपि पृथग्रूपोऽपि तेषां साक्षी इत्यर्थः आद्यं पुमांसमिति—विराट्पुरुषम्, प्रतिबोधरूपम्—अनेन नैयायिकानां ज्ञानाधिकरणत्वपक्षः खण्डितः । अप्रमेयम्—अपरिच्छेद्यम् अनन्तम्, प्रमितिरूपं स्वयं प्रमाया अगोचरम् विभुम्, देवर्षयोऽपि संकीर्तयन्ति इति सांख्यमतदार्ढ्यम् सूच्यते । शेषं पूर्ववत् ॥२८॥

---

१. भागवते पञ्चमस्कन्धे अध्यायः १९, श्लोकः १२ ॥

[1]भृग्वङ्गिराश्च पुलहश्च मरीचिमुख्याः
त्वां तोषयन्ति, पुरुषोत्तम ! सामगानैः ।
गङ्गातरङ्गरवताललयप्रयुक्तैः
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥२९॥

भृग्वङ्गिराश्च-भृगुसहितः अङ्गिराः भृग्वङ्गिराः । चकारः समुच्चयार्थः । द्वितीयश्चकारो भिन्नक्रमः, मरीचिमुख्या इत्यनेनान्वेति । पुरुषोत्तम इति-विराट्पुरुषात्पूर्वमत्र स्तुतादपि उत्तम, महत्तत्त्वोपाधिकचैतन्यरूप सामगानैः-शाखासहस्रप्रभेदेषु प्रगीतैरनन्तैः सामगानैः, स्नानागतदेवर्षियक्षलक्षपितृपक्षमज्जनोद्भूतजवसमुद्गमनप्रभ्रंशितलम्बमानतीररुहदेवद्रुमप्रसूनसंपृक्तंगङ्गातरङ्गरवानुसारिभ्यां ताललयाभ्यां प्रयुक्तैः त्वां तोषयन्ति तोषयितुं प्रयतन्ते । तोषफले प्रयत्ने लक्षणा । अत एव प्रतिदिनं मुहुर्मुहुरविरतं साम गायन्ति । शेषं पूर्ववत् ॥२९॥

---

१. महाभारते वनपर्वणि अध्यायः ११२, श्लोकः ६ ।

[1]सौगन्धिकाकुसुमगन्धयुतोऽनिलोऽयं
वक्षःस्थमाल्यमभिचालयति त्वदीयम् ।
मन्दाकिनीजलकणाः प्रतिबोधयन्ति
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥३०॥

सुगन्धानां शोभनानां गन्धानां समूहः सौगन्धम्, तदस्ति यस्यां लतायाम्, सा सौगन्धिका कमलिनी तस्याः कुसुमानां गन्धैर्युतः अयमनिलः, अनेन वातस्य सौगन्ध्यं सूच्यते। वक्षःस्थ-माल्यमभिचालयति त्वदीयमित्यनेन वायोर्मान्द्यं व्यज्यते। मन्दाकिनीजलकणाः वातानीताः तन्माल्यं प्रतिबोधयन्ति शोषात्संरक्ष्य सदा नवविकसितानीव कुर्वन्ति। अनेन वायोः शैत्यं व्यज्यते।। शेषं पूर्ववत् ॥३०॥

---

१. महाभारते वनपर्वणि अध्यायः १४६, श्लोकः ३।

पुष्पाणि बिन्दुसरसः[1] पवनावधूता-
न्याश्लेषयन्ति भवतः कमनीयगात्रम् ।
कामातुरा व्रजतरुण्य इवाम्बुजाक्षं
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥३१॥

पुष्पाणि विन्दुसरसः-एतन्नाम्नो ह्रदस्य तत्रत्यस्य चक्रवातेन स्रग्रूपेण ग्रथितानि पवनावधूतानि पवनेन कम्पनपूर्वकं वृन्ताद् भ्रंशितानि भवतः कमनीयगात्रम् आश्लेषयन्ति-आश्लेषं कुर्वन्ति। नामधातुः न तु आश्लिष्यतेर्णिच् अविवक्षणादर्थासंगतेश्च । कामिन्य इव कामुकम् इति भावः । चक्रवातेन स्रग्भावमापादितेषु पुष्पेषु भगवतः कमनीयगात्रालिङ्गनेन कामुकीत्वारोपः । कामातुरा व्रजतरुण्यो मदनवेपिता रासे अम्बुजाक्षं विष्णुं श्रीकृष्णमिव इति पवनेनैव रतिदूतेन भवत्समीपं प्रापितानि इत्यपि बोध्यम् । शेषं पूर्ववत् ॥३१॥

---

१. महाभारते वनपर्वणि अध्यायः १४५, श्लोकः ४४ ।

शीतस्तुषारकणिकावलिरंसदेशे
मुक्तामयीं रचयतीव तवाङ्गदाभाम् ।
शब्दापयन्ति पतगास्तव दर्शनोत्काः
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥३२॥

हे भगवन् शीतस्तुषारकणिकारूपो वलिः पूजार्थं मौक्तिक-माल्यरूपेण उपकल्पितं द्रव्यं वायुना श्रद्धया उपहृतः तव अंसदेशे अंससमीपे गंगायां घोष इतिवत्सामीप्ये लक्षणा। अंगदस्य स्कन्धे अधार्यत्वात्। बाहुधार्यत्वात् च। तुषारस्य स्वच्छत्वाद् करकावद् वर्तुलत्वाच्च मुक्तामयीमङ्गदाभामङ्गद-कान्ति रचयतीव। तव दर्शनोत्काः विन्दुसरसि स्थिताः पतगा हंसास्त्वां शब्दापयन्ति—शब्दाप्य समाधितः प्रवोधयन्ति। शेषं पूर्ववत् ॥३२॥

सृष्टोर्वशी सुरवधूगणगर्वशान्त्यै
चेतो हरेत्तव किलेति विचिन्त्य लक्ष्मीः ।
ईर्ष्यारुणेव तरुणार्कमरीचिकान्त्या
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥३३॥

सुवरधूगणगर्वशान्त्यै उर्वशी सृष्टा—अहमपि तव पत्नीत्वात् सुरवधूगणान्तर्गतैव सा च उर्वशी तव नित्यं संनिधानात् ऊर्वाश्रितवाच्च हे इत्तव—एति स्वसमीपं तौति गच्छति इति इत् तं तौति वर्धयति सुखसमृद्ध्यादिना इति इत्तवः तु सौत्रो धातुर्गतिवृद्धिर्हिंसासु । पचाद्यच् । तव चेतोहरा प्रेयसी इति विचिन्त्य लक्ष्मीः तरुणार्कमरीचिकान्त्येव किल इत्यलीके वस्तुतस्तु ईर्ष्यारुणा—उर्वशीविषयया ईर्ष्ययाऽरुणा । अनेन लक्ष्म्याः खण्डितनायिकात्वं समर्थ्यते प्रोच्यते च । वर्तते । हे श्रीनाथ तामनुनयस्व । एवंभूतस्य लक्ष्मीमनुनयमानस्य तव ध्यानान्मम हे वदरिकेश्वर सुप्रभातं भवतु ॥३३॥

आप्लाव्य पादरजसं तव पद्मनाभ !
लोकान् पुनातु मतिवेगमुपागतेयम् ।
[1]नन्दा स्वफेनपटलायितमन्दहासा
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥३४॥

हे पद्मनाभ, पद्मं नाभौ यस्येति बहुव्रीहिः । अनेन नाभिगतस्य पद्मस्य रजो भगवत्पादे पतितमिति ध्वन्यते । तव पादरजसं ब्रह्माणं बलिवञ्चनाय ब्रह्मलोकगते तव पादे पतितम्--पादस्य रजांसि यस्मिन् तमिति बहुव्रीहिः । आप्लाव्य--इयं नन्दा गङ्गाह्वया मत्या वेगं प्रवर्धितं नतु स्वाभाविकम्, तव पादप्रक्षालनार्थं त्वरितमायातुम्, उपागता, सा च लोकान् व्याप्य तव प्रेरणया पुनातु इति मम प्रार्थना । इयं च नन्दा तव पादप्रक्षालनसमुपजातहर्षातिरेकात् स्वफेनपटलरूपमन्दहासयुक्ता वर्तते । एवं समुपजातमन्दहासया नन्दया प्रक्षाल्यमानपादपद्मस्य तव ध्यानात् हे श्रीनाथ हे बदरिकेश्वर मम सुप्रभातं भवतु ॥३४॥

---

१. नन्दा - अलकनन्दा ॥

रम्भादिदेववनिताभ्य उपात्तशङ्का
त्वच्चित्तमात्मधनमित्यवबोधयन्ती ।
लक्ष्मी सदा वसति वक्षसि तावकीने
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥३५॥

हे श्रीनाथ त्वच्चित्तमात्मधनमित्यवबोधयन्ती अवबोधं कुर्वाणा जानती लक्ष्मीः त्वच्चित्तहरणे रम्भादिदेववनिताभ्यः उपात्तशङ्का उपात्तभया त्वच्चित्तरूपात्मसर्वस्वरक्षायै तावकीने वक्षसि सदा जागरूका वसति, नतु कदाचिदपि ततोऽपगच्छति । हे बदरिकेश्वर एवं लक्ष्म्या वक्षसि सदाऽऽलिङ्गितस्य तव ध्यानात् मम सुप्रभातं भवतु ॥३५॥

[1]प्रह्लादनारदकुचेलकरीन्द्रकुब्जा-
भीष्माम्बरीषपवनात्मजपाण्डुपुत्राः ।
औत्तानपादशबरीगुहगोपकन्याः
प्राचेतसश्च भरतश्च[2] विभीषणश्च ॥३६॥

प्रह्लादेत्यादि—प्रह्लादः कायाधवो गर्भे एव नारदोपदेशात् प्राप्तविज्ञानो जातोऽनन्यया भक्त्या भगवताऽनुगृहीतः। तत्पिता च हिरण्यकशिपुर्नृसिंहवेषेण हतः। नारदश्च दासीपुत्रो मातरि मृतायां सत्याम् ऋषीणामुपदेशेन संजातभगवद्विषयकपरोक्षबुद्धिः प्रव्रजन् पिप्पलोपस्थे ध्याने भगवन्तं साक्षात्कृतवान्। ततः परमनन्यया भक्त्या भगवतो निरतिशयप्रीतिपात्रं जातो ब्रह्मात्मजः। कुचेलः—सुदामानामा कृष्णसखा विप्रः अनन्यया भक्त्या भागवतोत्तमो जातः। करीन्द्रः शरणागत्या भगवत्प्रियः संपन्नः। कुब्जा गन्धानुलेपनदानेन परेण प्रेम्णा। भीष्मोऽनन्यया भक्त्या। अम्बरीषस्तपोभक्तिभ्याम्। पवनात्मजो निष्कामसेवयाऽनन्यया भक्त्या च। पाण्डुपुत्राः सख्येन निश्छलेन। औत्तानपादो ध्रुवः अपत्यस्य इदमर्थतया उक्तौ तस्यापत्यमित्यण्। स च परेण तपसा। शबरी भक्तितपोभ्याम्। गुहः सख्येन निश्छलेन, गोपकन्या निरतिशयप्रेम्णा। प्राचेतसो वाल्मीकिः रामनामकीर्तनेन, भरतो दाशरथिः, भ्रातृभक्त्या परेण च प्रेम्णा, विभीषणः शरणागत्या भक्त्या च भगवताऽनुगृहीताः ॥३६॥

---

१. त्रिभिः श्लोकैः भागवतोत्तमाः स्मर्यन्ते ॥

२. भरतः - राजा भरतः (जडभरतः) ।

द्रौपद्यलर्कशुकगौतमधर्मदाराः[1]
तार्क्ष्यार्कजौ विदुरशौनकधर्मदासाः ।
रुक्माङ्गदश्च भरतो[2] जनमेजयश्च
व्यासोऽभिमन्युतनयोऽथ पृथा जटायुः ॥३७॥

द्रौपदी शरणागत्या, अलर्को दत्तात्रेयोपदिष्टेन योगेन, शुकः स्वपितृनारदाभ्यामुपदिष्टाभ्यां सांख्ययोगाभ्याम्, गौतमधर्मदाराः स्वभर्त्तुः शापानुग्रहप्राप्तेन भगवत्पादस्पर्शेन, तार्क्ष्यः सततसेवया निष्कामया, अर्कजो वैवस्वतो मनुः भक्त्या स्वकर्मणा प्रजापालनेन च, विदुरोऽनन्यया भक्त्या, शौनकः सांख्ययोगाभ्यां भक्त्या च, धर्मदासो निष्कामकर्मभक्तिभ्यां, रुक्माङ्गदो भक्त्या सहजया, भरतो जडभरतः सांख्ययोगाभ्यामनन्यया भक्त्या च । सिंहावलोकनन्यायेन व्युत्क्रमेण उक्तिः । जनमेजयो नवलक्षणया भक्त्या, व्यासो नारदोपदेशेन सांख्ययोगाभ्यामनन्यया भक्त्या च । अभिमन्युतनयः परीक्षितः गर्भे आत्मरक्षणरूपभगवदनुग्रहश्रवणसमुपजातभक्त्या शुकोपदेशेन सांख्ययोगाभ्याञ्च । पृथा स्नेहेन निरतिशयेन, जटायुरात्मनिवेदनेन भगवत्प्रियाः ॥३७॥

---

१. अहल्या २. भरतः - दाशरथिः

त्वत्पादपद्ममधुपाः खलु साक्षिणस्ते
भक्तावनैकपरतां प्रति दीनबन्धो !
त्वत्तो न मेऽस्ति भवसागरतारकोऽन्यः
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥३८॥

हे दीनबन्धो षष्ठीतत्पुरुषो बहुव्रीहिश्च। ते भक्तावनैकपरतां प्रति आस्तिकनास्तिकयोर्विवादे पूर्वोक्ताः प्रह्लादनारदादयः त्वत्पादपद्मधुपाः तवानन्यभक्ताः साक्षिणः साक्षाद् द्रष्टारः प्रतिभुवः। अन्येषां परिगण्य लघुपापवतां जनानामन्येऽपि सन्ति भवसागरोत्तारका देवाः, मम तु पारेपरार्धमहापापवतः तरिभारभूतस्य हे श्रीनाथ त्वत्तोऽन्यो भवसागरतारको नास्ति, अजामिलव्याधगणिकादितारकत्वेन दृष्टप्रत्ययत्वात्। शेषं पूर्ववत् ॥३८॥

योगी निमील्य नयने हिमशैलशृङ्गे
निस्सङ्ग एष तप आचरतीह मौनी ।
चित्रं तथाऽपि भुवनावनजागरूकः
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥३९॥

हे श्रीनाथ एष भवान्—मम हृदये नित्यं संनिहितत्वात् मम समीपतरवर्ती भवान् । 'इदमस्तु संनिकृष्टं समीपतरवर्ति चैतदो रूपम् (अर्थः) । अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात् ॥' इति कोषः । इह दुर्गमे जनसंचाररहिते हिमशैलशृंगे नयने निमील्य योगी निर्विकल्पे समाधौ स्थितो निर्व्यापारः, निःसङ्गः आदेश्यभृत्यरहितः मौनी—वाचाऽपि अनादिशन् तप आचरति । स्वयं क्रियया वाचा वा आदेश्यभृत्यद्वारा वा प्रजापालनमकुर्वाणः तथापि चित्रम्—भुवनावनजागरूकः, समाधितः प्राक् समुत्पन्नेन संल्कपेनैव भुवनावनपरोऽसि । शेषं पूर्ववत् ॥३९॥

नारायणस्त्वमखिलं च नरादभिन्नः
भेदो नराद्भ्रमज इत्यवबोधयिष्णुः ।
युग्माकृतिर्युगपदेकवपुर्विभासि
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥४०॥

हे श्रीनाथ—त्वं नारायणः "आपो नारा इति प्रोक्ता आपो वै नरसूनवः । तस्य ता अयनं पूर्वं तेन नारायणः स्मृतः" । इति स्मृतिः । किञ्च त्वं नरादभिन्नः, नराद् ऋषेः मनुष्य-समाजाच्च । न केवलं नरादभिन्नः, किन्तु अखिलं च त्वम्, विश्वरूपः, एवं च भेदो नराद् भ्रमजः इत्यवबोधयिष्णुः—जनेषु अवबोधोत्पादनशीलस्त्वम् युग्माकृतिर्नरनारायणाकृतिर्युगपदेक-वपुश्च त्वं विभासि हिमवत् शृङ्गे स्थितः । बदरीशस्तवस्य अस्य च्छन्दःसादृश्येन च्छन्दस्त्वमारोप्य अवबोधयतेर्ण्यन्ता-दिष्णुच् । गौणमुख्यन्यायस्तु पदकार्ये एव प्रतर्तते न तु निमित्तस्य गौणत्वं वारयति प्रवर्तमानः । शेषं पूर्ववत् ॥४०॥

अन्यावतारसमये विविधक्रियाभि-
धर्मस्थितिर्विरचिता किमु तत्र चित्रम् ।
निष्कर्मणैव जगतीमिह पासि विष्णो
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥४१॥

हे विष्णो विश्वव्यापक, अन्यावतारसमये कार्यार्थं परिच्छिन्नविग्रहधारणसमये विविधक्रियाभिः साधूनां परित्राणेन दुष्कृतां विनाशनेन बुद्धहंसाद्यवतारेषु उपदेशेन च, धर्मस्थितिः धर्मपालनं कृतम् लोकान् स्वकृतमर्यादासु स्वासु स्वासु संस्थाप्य । 'एष सेतुर्विधरण एषां लोकानामसंभेदाय' इति श्रुतेः । तत्र अन्यावतारकृतेषु कर्मसु किमु चित्रम् । ईश्वरस्य प्रभवतस्ते तानि तानि धर्मसंरक्षणार्थं कृतानि कर्माणि नाश्चर्यकराणि । इह तु नरनारायणावतारे निष्कर्मणैव वपुषा, पञ्चम्यर्थे बहुव्रीहिः । सदा समाहितेन संकल्पमात्रेण धर्मसंरक्षणद्वारा लोकमर्यादा स्थापनेन जगतीं पासि इत्येतच्चित्रम् । अदृष्टाश्रुतचरत्वात् । शेषं पूर्ववत् ॥४१॥

योगेश्वरोऽस्यखिललोकगुरुस्वरूप-
स्त्वन्तर्मुखस्त्रिभुवनस्य च साक्षिभूतः ।
सृष्ट्यादिकं प्रकृतिकृत्यमवेक्षमाणः
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥४२॥

ह श्रीनाथ त्वं योगेश्वरः असि, योगाः विविधाः यमनियमाद्युपायाः, चित्तवृत्तिनिरोधः, प्राणनिग्रहः, सविकल्पनिर्विकल्परूपौ ध्यानयोगौ, अन्येऽपि च प्रकृतिपुरुषान्यताख्यात्युपायाः, ते योगाः सन्ति येषां ते योगाः अर्श आद्यच् । युक्तयुञ्जानभेदाद् द्विविधा योगिनः, तेषामीश्वरो नियन्ता असतो योगमार्गान्निवर्त्य सति योगमार्गे प्रवर्तकः असि । अत एवाखिललोकगुरुस्वरूपः—योगिनां योगमार्गोपदेन अयोगिनाञ्च पितृतया गुरुस्वरूपः असि । तथा च योगसूत्रम्—"स पूर्वेषामपि गुरुः कालेनानवच्छेदात्" इति । उदयनश्च—स्वाम्यं यस्य निजं जगत्सुजनितेष्वादौ ततः पालनम्, व्युत्पत्तेः करणं हिताहितविधिव्यासेधसम्भावनम् । भूतोक्तिः सहजा कृपा निरुपधिर्यत्नस्तदर्थात्मकः, तस्मै पूर्वगुरूत्तमाय जगतामीशाय पित्रे नमः ।" इति । अन्तर्मुखस्तु अन्तर्मुखोऽपि, विषयव्यावृत्तदृष्टिरपि, त्रिभुवनस्य साक्षिभूतश्च प्रकाशकोऽपि, "तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति" इतिश्रुतेः । अत एव सृष्ट्यादिकं प्रकृतिकृत्यमवेक्षमाणः बालः क्रीडनकानि इव, असि, एवंस्वरूपस्य ते ध्यानस्मरणाभ्यां हे बदरिकेश्वर मम सुप्रभातं भवतु ॥४२॥

नास्त्येव किञ्चिदपि मद्व्यतिरिक्तमत्र
सोऽहं च हंसवपुरस्मि नरोऽपि सोऽहम् ।
इत्थं प्रबोधयसि यस्सनकादिशिष्यान्
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥४३॥

हे श्रीनाथ यस्त्वम्—अत्र जगति मद्व्यतिरिक्तं किञ्चिदपि नास्त्येव रज्जौ भुजङ्ग इव सर्वस्य विवर्तोपादाने मयि कल्पितत्वात्—एवं यः सर्वस्य कल्पनाधिष्ठानभूतो निर्गुणनिर्विशेषचैतन्यरूपः सोऽहं च गुणैः परिच्छिन्नः हंसवपुरस्मि सनकादीनां युष्माकमात्मयोगोपदेष्टा, नरोऽपि नारायणसहचरः सोऽहम् । इत्थं सनकादीन् स्वशिष्यान् प्रबोधयसि उपदेशेन हे बदरिकेश्वर तस्य ते ध्यानस्मरणाभ्यां मम सुप्रभातं भवतु ॥४३॥

ईक्षा प्रकृत्यभिमुखी भवहेतुभूता
विश्वस्थितिं प्रकुरुते तव योगचर्या ।
संहारकृत्यमपि नेत्रनिमीलनात्ते
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥४४॥

हे श्रीनाथ तव प्रकृत्यभिमुखी, प्रकृतिविषया ईक्षा—ईक्षणम्—संकल्पः सर्गानुकूलः, भवहेतुभूता, सर्गनिमित्तकारणम् तव योगचर्या, विश्वस्थितिं विश्वपालनं प्रकुरुते, "नास्ति सांख्यसमं ज्ञानं नास्ति योगसमं वल"मिति हि शिष्टाः। जगतः संहाररूपं कृत्यमपि तव नेत्रनिमीलनात् योगनिद्रारूपात् पालनव्यापारोपरमे सति भवति, हे वदरिकेश्वर एवंभूतस्य ते ध्यानस्मरणाभ्यां मम सुप्रभातं भवतु ॥४४॥

उन्मीलयाशु भगवन्नयनाब्जकोशं
आह्लादयन्तु भुवनं करुणाकटाक्षाः ।
लोकाश्च रोगभयरागविवर्जितास्स्युः
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥४५॥

हे भगवन् वन्दिन इव ममैतां भवत्स्तुतिं सुप्रभाते निशम्य ह त्रिभुवनसार्वभौम योगनिद्रां विहाय नयनाब्जकोशमाशु उन्मीलय । तव करुणाकटाक्षाः भुवनम् आह्लादयन्तु आह्लादयन्तः पालयन्तु । आह्लादयतिः आह्लादनपूर्वके पालने लाक्षणिकः । लोका रोगभयविषयरागविवर्जिताश्च स्युः । हे श्रीनाथ हे बदरिकेश्वर तव करुणाकटाक्षैर्विलोकितस्य मम सुप्रभातं भवतु ॥४५॥

मोहान्धकारनिबिडे मम हृद्गुहान्तः
कारुण्यदीप्तिमभिवर्षतु ते कटाक्षः ।
यद्वर्चसा च निजरूपमभिस्फुरेन्मे
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥४६॥

हे श्रीनाथ ते कटाक्षः जातावेकवचनम् । मोहान्धकार-निविडे अविद्यातमश्छन्ने मम हृद्गुहान्तः शक्त्या विभक्त्यर्थ-प्रधानस्यापि अन्तरव्ययस्यात्र लक्षणया सत्त्वप्रधानत्वम् । कारुण्यदीप्तिम् कारुण्यप्रयुक्तं प्रकाशम् मध्यमपदलोपी समासः । अभिवर्षतु अभिमुखीकृत्य वर्षतु सूर्यचन्द्रलोचन-त्वात् । यद्वर्चसा यस्य कटाक्षस्य तेजसा प्रकाशेन हृद्गुहान्त-स्तमोनिरासे च मम निजरूपम् सच्चिदानन्दरूपम् अभिस्फुरेत् तमसि विद्युद्विद्योतनेनेव प्रत्यक्षगोचरं स्यात् । तथा च श्रुतिः 'विद्युद् व्यद्योतादिव' इति । हे बदरिकेश्वर एवं तव करुणा-कटाक्षावलोकितस्य मम सुप्रभातं भवतु ॥४६॥

व्यामोहहैमपवनेन विशुष्कमेतत्
मच्चित्तपद्ममुकुलं विकसेत्पुनश्च ।
त्वन्नेत्रमित्रकिरणैस्त्वरितं मुरारे
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥४७॥

हे श्रीनाथ व्यामोहरूपेण हैमपवनेन हिमसंपृक्तवातेन विशुष्कम् शुष्काद् विपरीतम् आर्द्रीकृतम् जडीकृतम् संकोचितम्, एतत् मच्चित्तपद्ममुकुलं त्वन्नेत्रभूतस्य मित्रस्य सूर्यस्य किरणैः त्वरितं पुनश्च विकसेत् । विशेषरूपेण शुष्कमित्यर्थे तु विकासासंभवः । हे मुरारे हे बदरिकेश्वर पूर्वोक्तप्रकारेण मच्चित्तपद्ममुकुलविकासकस्य तव कृपया मम सदा सुप्रभातं भवतु । अत्राप्रयुक्तं पदमध्याहृतं वेदितव्यम् ॥४७॥

श्रीगौडपादयतिराजमथास्य शिष्यं
गोविन्दपादमथ शङ्करदेशिकेन्द्रम् ।
तच्छिष्यकोटिमभिवन्द्य कृतिः कृतेयं
तुष्ट्यै सतां च बदरीश्वरसुप्रभातम् ॥४८॥

श्रीगौडपादयतिराजमथास्य शिष्यं गोविन्दपादम्, अथास्य शिष्यं शंकरदेशिकेन्द्रम् तस्य च शिष्यकोटिम् अभिवन्द्य इयं वदरीशसुप्रभातमिति नाम्ना विदिता कृतिर्मया कृता अत इयं निर्विघ्नं प्रचरेत् प्रसरेच्च। किञ्चेयं सतां तुष्ट्यै भूयात् इति प्रार्थये त्वाम्। अत्राप्रयुक्तं पदमध्याहृतं मया वक्तुस्तात्पर्यानुरोधेन ॥४८॥

श्रीकामकोटिवरपीठमधिष्ठितो यः
श्रीचन्द्रशेखरयतिः करुणाम्बुराशिः ।
तस्याशिषा विरचितं खलु रामचन्द्र-
संचोदितेन बदरीश्वरसुप्रभातम् ॥४९॥

श्रीकामानां भक्तानां कोट्या वरणीयं वरप्राप्त्यै आश्रयणीयं पीठम् आचार्यपादपीठमधिष्ठितो यः करुणाम्बुराशिः श्रीचन्द्रशेखरयतिः तस्याशिषा—आशीःप्राप्तबलेन रामचन्द्रसंचोदितेन सुहृद्वरश्रीरामचन्द्रसंप्रेरितेन मया वदरीश्वरसुप्रभातम् एतन्नामकं स्तोत्रं विरचितं खलु। एतेन स्तोत्रनिर्मितिनिमित्तं संसूचितम् ॥४९॥

श्रीस्वामिनाथरचितं तव सुप्रभातं
स्तोत्रं त्विदं श्रवणकीर्तनलेखनात्ते ।
तुष्ट्यै भवेद्भुवनमङ्गलदायकस्य
नारायणस्य सनरस्य रसार्णवस्य ॥५०॥

हे श्रीनाथ बदरिकेश्वर श्रीस्वामिनाथरचितं सुप्रभातम् एतन्नामकम्, इदं स्तोत्रं तु श्रवणकीर्तनलेखनात् । समाहार-द्वन्द्वात् पञ्चम्येकवचनम् । भुवनमङ्गलदायकस्य सनरस्य नरसहचरस्य रसार्णवस्य आनन्दपयोधेः । 'रसो वै सः' इति श्रुतेः । नारायणस्य ते तव तुष्ट्यै भवेदिति आशंसे ॥५०॥

प्रक्षालयन्तु सन्तो मनसा संतोषशीलेन ।
इमां जरद्गवीं मे विस्मृतिपङ्के मुहुर्मग्नाम् ॥

इदं त्ववधेयम् यदेतद्व्याख्याने मया यथामति वर्णितम्, तत्सर्वं श्रीमतां लोकवन्द्यानां काञ्चीपुरपीठाधीश्वराणां श्रीशंकराचार्यपादानां संमतिमधीत्य, न ममात्र किञ्चिदण्वपि इति ।

इयं श्रीब्रह्मीभूत काशीनाथतनयसौभद्रेयरघुनाथकृतिः श्रीबदरीशसुप्रभातव्याख्या २०३९ तमे वैक्रमाब्दे कार्तिककृष्ण-त्रयोदश्यां शनिवासरे 'वलिया' जनपदान्तर्गते 'छाता' नाम्नि ग्रामे मातृसदने पूर्णा ।

शं बोभवीतु जगतो बदरीशः प्रसीदतु ।
गीर्वाणभारती देशे भारते प्रतितिष्ठतु ॥

लेखक :

डा० सी० आर० (शास्त्रपुरम् रामकृष्ण) स्वामिनाथन् 'कार्यकारः'
एम० ए० (न्याय-साहित्यशास्त्रयोः) साहित्याचार्यः,
एम० लिट्०, पीएच० डी०

जन्मतिथिः : १०-३-१९२७

जन्मस्थानम् : पालघाट (केरल)

रचनाः : (१) जानकीहरणम् (Critical Edition & Study)
(२) गीताभाष्याणां तुलनात्मकमध्ययनम् (पीएच० डी०-शोधप्रबन्धः)
(३) श्रीबदरीशसुप्रभातम् (४) कर्णभूषणम्
(५) Ralligious trends in Nepal History
(Heritage of Nepal—ग्रन्थे सहलेखनम्)
(६) शंकरविजयम् (मलयालम-नेपालीभाषयोः)
(६) प्रकीर्णाः कविताः शोधलेखाश्च

वृत्तिः : शासकीयसेवा । भारतशासनस्य शिक्षामन्त्रालये उप-परामर्शदाता (संस्कृते) ।